Paper : **II**

Subject : **SANSKRIT**

Subject Code : **19**

Roll No. | | | | | | | | |

(Figures as per admission card)

OMR Sheet No. : ________________

BOOKLET SERIAL NO.

## Name & Signature of Invigilator/s

Signature : ____________________________

Name : ____________________________

Time : 2 Hours | Maximum Marks : 200

Number of Pages in this Booklet : **12** | Number of Questions in this Booklet : **100**

### Instructions for the Candidates

1. Write your roll number in the space provided on the top of this page.
2. This paper consists of Hundred multiple-choice type of questions.
3. At the commencement of examination, the question booklet will be given to you. In the first 5 minutes, you are requested to open the booklet and compulsorily examine it as below :
   (i) To have access to the Question Booklet, tear off the paper seal on the edge of the cover page. Do not accept a booklet without sticker seal or open booklet.
   (ii) **Tally the number of pages and number of questions in the booklet with the information printed on the cover page. Faulty booklets due to pages/questions missing or duplicate or not in serial order or any other discrepancy should be got replaced immediately by a correct booklet from the invigilator within the period of 5 minutes. Afterwards, neither the Question Booklet will be replaced nor any extra time will be given.**
4. Each item has four alternative responses marked (A), (B), (C) and (D). You have to darken the circle as indicated below on the correct response against each item.
   **Example** : (A) (B) ● (D)
   where (C) is the correct response.
5. Your responses to the questions are to be indicated in the **OMR Sheet kept inside this Booklet.** If you mark at any place other than in the circles in the OMR Sheet, it will not be evaluated.
6. Read the instructions given in OMR carefully.
7. Rough Work is to be done in the end of this booklet.
8. If you write your name or put any mark on any part of the OMR Answer Sheet, except for the space allotted for the relevant entries, which may disclose your identity, you will render yourself liable to disqualification.
9. You have to return the OMR Answer Sheet to the invigilators at the end of the examination compulsorily and must NOT carry it with you outside the Examination Hall.
10. You can take away question booklet and carbon copy of OMR Answer Sheet after the examination.
11. **Use only Blue/Black Ball point pen.**
12. **Use of any calculator, electronic gadgets or log table etc., is prohibited.**
13. **There is no negative marks for incorrect answers.**
14. **In case of any discrepancy found in the Kannada translation of a question booklet the question in English version shall be taken as final.**

### ಅಭ್ಯರ್ಥಿಗಳಿಗೆ ಸೂಚನೆಗಳು

1. ಈ ಪುಟದ ಮೇಲ್ತುದಿಯಲ್ಲಿ ಒದಗಿಸಿದ ಸ್ಥಳದಲ್ಲಿ ನಿಮ್ಮ ರೋಲ್ ನಂಬರನ್ನು ಬರೆಯಿರಿ.
2. ಈ ಪತ್ರಿಕೆಯು ಬಹು ಆಯ್ಕೆ ವಿಧದ ನೂರು (100) ಪ್ರಶ್ನೆಗಳನ್ನು ಒಳಗೊಂಡಿದೆ.
3. ಪರೀಕ್ಷೆಯ ಪ್ರಾರಂಭದಲ್ಲಿ, ಪ್ರಶ್ನೆ ಪುಸ್ತಿಕೆಯನ್ನು ನಿಮಗೆ ನೀಡಲಾಗುವುದು. ಮೊದಲ 5 ನಿಮಿಷಗಳಲ್ಲಿ ನೀವು ಪುಸ್ತಿಕೆಯನ್ನು ತೆರೆಯಲು ಮತ್ತು ಕೆಳಗಿನಂತೆ ಕಡ್ಡಾಯವಾಗಿ ಪರೀಕ್ಷಿಸಲು ಕೋರಲಾಗಿದೆ.
   (i) ಪ್ರಶ್ನೆಪುಸ್ತಿಕೆಗೆ ಪ್ರವೇಶಾವಕಾಶ ಪಡೆಯಲು, ಈ ಹೊದಿಕೆ ಪುಟದ ಅಂಚಿನ ಮೇಲಿರುವ ಪೇಪರ್ ಸೀಲನ್ನು ಹರಿಯಿರಿ. ಸ್ಟಿಕ್ಕರ್ ಸೀಲ್ ಇಲ್ಲದ ಅಥವಾ ತೆರೆದ ಪುಸ್ತಿಕೆಯನ್ನು ಸ್ವೀಕರಿಸಬೇಡಿ.
   (ii) **ಪುಸ್ತಿಕೆಯಲ್ಲಿನ ಪ್ರಶ್ನೆಗಳ ಸಂಖ್ಯೆ ಮತ್ತು ಪುಟಗಳ ಸಂಖ್ಯೆಯನ್ನು ಮುಖಪುಟದ ಮೇಲೆ ಮುದ್ರಿಸಿದ ಮಾಹಿತಿಯೊಂದಿಗೆ ತಾಳೆ ನೋಡಿರಿ. ಪುಟಗಳು/ಪ್ರಶ್ನೆಗಳು ಕಾಣೆಯಾದ ಅಥವಾ ದ್ವಿಪ್ರತಿ ಅಥವಾ ಅನುಕ್ರಮವಾಗಿಲ್ಲದ ಅಥವಾ ಇತರ ಯಾವುದೇ ವ್ಯತ್ಯಾಸದ ದೋಷಪೂರಿತ ಪುಸ್ತಿಕೆಯನ್ನು ಕೂಡಲೆ 5 ನಿಮಿಷದ ಅವಧಿ ಒಳಗೆ, ಸಂವೀಕ್ಷಕರಿಂದ ಸರಿ ಇರುವ ಪುಸ್ತಿಕೆಗೆ ಬದಲಾಯಿಸಿಕೊಳ್ಳಬೇಕು. ಆ ಬಳಿಕ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಬದಲಾಯಿಸಲಾಗುವುದಿಲ್ಲ, ಯಾವುದೇ ಹೆಚ್ಚು ಸಮಯವನ್ನೂ ಕೊಡಲಾಗುವುದಿಲ್ಲ.**
4. ಪ್ರತಿಯೊಂದು ಪ್ರಶ್ನೆಗೂ (A), (B), (C) ಮತ್ತು (D) ಎಂದು ಗುರುತಿಸಿದ ನಾಲ್ಕು ಪರ್ಯಾಯ ಉತ್ತರಗಳಿವೆ. ನೀವು ಪ್ರಶ್ನೆಯ ಎದುರು ಸರಿಯಾದ ಉತ್ತರದ ಮೇಲೆ, ಕೆಳಗೆ ಕಾಣಿಸಿದಂತೆ ಅಂಡಾಕೃತಿಯನ್ನು ಕಪ್ಪಾಗಿಸಬೇಕು.
   **ಉದಾಹರಣೆ** : (A) (B) ● (D)
   (C) ಸರಿಯಾದ ಉತ್ತರವಾಗಿದ್ದಾಗ.
5. ಈ ಪ್ರಶ್ನೆ ಪತ್ರಿಕೆಯ ಜೊತೆಯಲ್ಲಿ **ಕೊಟ್ಟಿರುವ OMR ಉತ್ತರ ಹಾಳೆಯಲ್ಲಿ ನಿಮ್ಮ ಉತ್ತರಗಳನ್ನು ಸೂಚಿಸತಕ್ಕದ್ದು**. OMR ಹಾಳೆಯಲ್ಲಿ ಅಂಡಾಕೃತಿಯಲ್ಲದೆ ಬೇರೆ ಯಾವುದೇ ಸ್ಥಳದಲ್ಲಿ ಉತ್ತರವನ್ನು ಗುರುತಿಸಿದರೆ, ಅದರ ಮೌಲ್ಯಮಾಪನ ಮಾಡಲಾಗುವುದಿಲ್ಲ.
6. OMR ಉತ್ತರ ಹಾಳೆಯಲ್ಲಿ ಕೊಟ್ಟ ಸೂಚನೆಗಳನ್ನು ಜಾಗರೂಕತೆಯಿಂದ ಓದಿರಿ.
7. ಎಲ್ಲಾ ಕರಡು ಕೆಲಸವನ್ನು ಪುಸ್ತಿಕೆಯ ಕೊನೆಯಲ್ಲಿ ಮಾಡತಕ್ಕದ್ದು.
8. ನಿಮ್ಮ ಗುರುತನ್ನು ಬಹಿರಂಗಪಡಿಸಬಹುದಾದ ನಿಮ್ಮ ಹೆಸರು ಅಥವಾ ಯಾವುದೇ ಚಿಹ್ನೆಯನ್ನು, ಸಂಗತವಾದ ಸ್ಥಳ ಹೊರತು ಪಡಿಸಿ, OMR ಉತ್ತರ ಹಾಳೆಯ ಯಾವುದೇ ಭಾಗದಲ್ಲಿ ಬರೆದರೆ, ನೀವು ಅನರ್ಹತೆಗೆ ಬಾಧ್ಯರಾಗುತ್ತೀರಿ.
9. ಪರೀಕ್ಷೆಯು ಮುಗಿದನಂತರ, ಕಡ್ಡಾಯವಾಗಿ OMR ಉತ್ತರ ಹಾಳೆಯನ್ನು ಸಂವೀಕ್ಷಕರಿಗೆ ನೀವು ಹಿಂತಿರುಗಿಸಬೇಕು ಮತ್ತು ಪರೀಕ್ಷಾ ಕೊಠಡಿಯ ಹೊರಗೆ OMRನ್ನು ನಿಮ್ಮೊಂದಿಗೆ ಕೊಂಡೊಯ್ಯಕೂಡದು.
10. ಪರೀಕ್ಷೆಯ ನಂತರ, ಪರೀಕ್ಷಾ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಮತ್ತು ನಕಲು OMR ಉತ್ತರ ಹಾಳೆಯನ್ನು ನಿಮ್ಮೊಂದಿಗೆ ತೆಗೆದುಕೊಂಡು ಹೋಗಬಹುದು.
11. **ನೀಲಿ/ಕಪ್ಪು ಬಾಲ್‌ಪಾಯಿಂಟ್ ಪೆನ್ ಮಾತ್ರವೇ ಉಪಯೋಗಿಸಿರಿ.**
12. **ಕ್ಯಾಲ್ಕುಲೇಟರ್, ವಿದ್ಯುನ್ಮಾನ ಉಪಕರಣ ಅಥವಾ ಲಾಗ್ ಟೇಬಲ್ ಇತ್ಯಾದಿಯ ಉಪಯೋಗವನ್ನು ನಿಷೇಧಿಸಲಾಗಿದೆ.**
13. **ಸರಿ ಅಲ್ಲದ ಉತ್ತರಗಳಿಗೆ ಋಣ ಅಂಕ ಇರುವುದಿಲ್ಲ.**
14. **ಕನ್ನಡ ಮತ್ತು ಇಂಗ್ಲೀಷ್ ಆವೃತ್ತಿಗಳ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಗಳಲ್ಲಿ ಯಾವುದೇ ರೀತಿಯ ವ್ಯತ್ಯಾಸಗಳು ಕಂಡುಬಂದಲ್ಲಿ, ಇಂಗ್ಲೀಷ್ ಆವೃತ್ತಿಗಳಲ್ಲಿರುವುದೇ ಅಂತಿಮವೆಂದು ಪರಿಗಣಿಸಬೇಕು.**

# SANSKRIT
## Paper – II

**Note :** This paper contains **hundred (100)** objective type questions. **Each** question carries **two (2)** marks. **All** questions are **compulsory**.

1. ‘‘ तम आसीत्तमसा गूढमग्रेऽप्रकेतम्’’ इदं कदा आसीत् ?
   (A) सृष्टे: प्राक्  (B) सृष्ट्यनन्तरम्
   (C) सर्वदा  (D) वर्तमानकाले

2. एषु इन्द्रस्य मन्त्रं चिनुत।
   (A) तदस्य प्रियमभि पाथो अभ्याम्
   (B) यस्य शुष्माद्रोदसी अभ्यसेताम्
   (C) धीरा त्वस्य महिना जनूंषि
   (D) स्वादोरभक्षि वयस: सुमेधा:

3. पुरुषसूक्ते क: ऋषि: ?
   (A) हिरण्यगर्भ:  (B) नारायण:
   (C) विश्वामित्र:  (D) वशिष्ठ:

4. गायत्री छन्दसि कति पादा: सन्ति ?
   (A) 3  (B) 6
   (C) 9  (D) 12

5. कस्य ऊरुषु भुवनानि अधिक्षियन्ति ?
   (A) इन्द्रस्य
   (B) वरुणस्य
   (C) विष्णो:
   (D) पुरुषस्य

6. ऐतरेय-ब्राह्मणं कस्य वेदस्य ?
   (A) ऋग्वेदस्य  (B) यजुर्वेदस्य
   (C) सामवेदस्य  (D) अथर्ववेदस्य

7. उपनिषद् इति पदे क: प्रत्यय: ?
   (A) णिच्  (B) घञ्
   (C) क्विप्  (D) अच्

8. तैत्तिरीय-आरण्यकं कस्य वेदस्य ?
   (A) अथर्ववेदस्य  (B) सामवेदस्य
   (C) यजुर्वेदस्य  (D) ऋग्वेदस्य

9. अधस्तनेषु उपयुक्ततालिकां चिनुत।

| | |
|---|---|
| a. अग्नि: | 1. हिरण्यपाणि: |
| b. वरुण: | 2. सप्तरश्मि: |
| c. सविता | 3. कविक्रतु: |
| d. इन्द्र: | 4. कवितर: |

| | a | b | c | d |
|---|---|---|---|---|
| (A) | 1 | 3 | 4 | 2 |
| (B) | 2 | 1 | 3 | 4 |
| (C) | 3 | 4 | 1 | 2 |
| (D) | 4 | 3 | 2 | 1 |

10. किं नाम निरुक्तम् ?
   (A) वेदाङ्गम्  (B) शब्दनिर्वचनम्
   (C) पदनिर्वचनम्  (D) वेदव्याख्यानम्

**11.** भावप्रधानम्

(A) कर्म (B) आख्यातम्

(C) भावनम् (D) नाम

**12.** एतेषु महायान–सम्प्रदायस्य दर्शनशाखा नास्ति

(A) सौत्रान्तिक: (B) योगाचार:

(C) अन्यत् (D) माध्यमिक:

**13.** एतेषु सप्तभङ्गीनये नास्ति।

(A) स्यान्नास्ति च वक्तव्यम्

(B) स्यादस्ति च नास्ति च

(C) स्यादस्ति चावक्तव्यम्

(D) स्यात् नास्ति च अवक्तव्यम्

**14.** न्यायमते भावना तिष्ठति।

(A) मनसि (B) महति

(C) आत्मनि (D) अहंकारे

**15.** मीमांसामते कतिभावना ?

(A) नव (B) अष्ट

(C) दश (D) द्वे

**16.** योगसूत्रानुसारं ब्रह्मचर्येण भवति

(A) कैवल्यलाभ:

(B) असम्प्रज्ञातसमाधि:

(C) वीर्यलाभ:

(D) ध्याने–स्थिरता

**17.** योगानुसारं शौचं कतिविधम् ?

(A) सकृत् (B) द्विविधम्

(C) त्रिविधम् (D) चतुर्विधम्

**18.** योगमते संस्कारसाक्षात्कारेण सिद्धयति

(A) अदृष्टवस्तूनां दर्शनम्

(B) आत्मन: प्रत्यक्षम्

(C) पूर्वजन्मन: दर्शनम्

(D) मनस: प्रत्यक्षम्

**19.** सांख्यमते विकृतय: सन्ति।

(A) षोडश (B) त्रयोविंशति

(C) अष्टादश (D) चतुर्विंशति

**20.** समीचीनां तालिकां चिनुत।

| | |
|---|---|
| a. पर: सन्निकर्ष: | 1. शि |
| b. आदैच् | 2. उपधा |
| c. सर्वनामस्थानम् | 3. संहिता |
| d. अलोऽन्त्यात् पूर्व: | 4. वृद्धि: |

| | **a** | **b** | **c** | **d** |
|---|---|---|---|---|
| (A) | 3 | 4 | 2 | 1 |
| (B) | 2 | 1 | 4 | 3 |
| (C) | 3 | 4 | 1 | 2 |
| (D) | 1 | 3 | 2 | 4 |

**21.** अधोलिखितानां सम्यक्मेलनं कुरुत।

| | |
|---|---|
| a. बौद्धा: | 1. प्रामाण्यं स्वतोऽप्रामाण्यं परत: |
| b. सांख्या: | 2. अप्रामाण्यं स्वत: प्रामाण्यं परत: |
| c. नैयायिका: | 3. प्रामाण्याप्रामाण्ये स्वत: |
| d. पूर्वमीमांसका: | 4. प्रामाण्याप्रामाण्ये परत: |

| | **a** | **b** | **c** | **d** |
|---|---|---|---|---|
| (A) | 3 | 2 | 1 | 4 |
| (B) | 4 | 3 | 1 | 2 |
| (C) | 3 | 2 | 4 | 1 |
| (D) | 2 | 3 | 4 | 1 |

**22.** न्यायमते एतेषु प्रमेयो नास्ति।

(A) अपवर्ग: (B) अर्था:

(C) मन: (D) जाति:

**23.** शब्दीभावनायां करणत्वेन अन्वेति।

(A) धात्वर्थ: (B) लिङ्गर्थ:

(C) काल: (D) संख्या

**24.** आर्थीभावनायां साध्यत्वेन अन्वेति।

(A) फलम् (B) करणम्

(C) लिङ्गर्थ: (D) धात्वर्थ:

**25.** शाब्दीभावनायां साध्यत्वेन अन्वेति।

(A) फलम् (B) आर्थीभावना

(C) काल: (D) कर्म

**26.** काले गुणा: सन्ति।

(A) पञ्च (B) षट्

(C) अष्टौ (D) नव

**27.** जले रसोऽस्ति।

(A) पाकज: (B) अपाकज:

(C) उभयथा (D) नोभयथा

**28.** ''प्रमाणसमुच्चय:'' इत्यस्यलेखक:।

(A) दिङ्नाग:

(B) धर्मकीर्ति:

(C) जगदीशतर्कालङ्कार:

(D) रघुनाथशिरोमणि:

**29.** पुरुषार्थं प्रकृति: आत्मानं कतिभिर्बध्नाति ?

(A) अष्टभि: (B) नवभि:

(C) सप्तभि: (D) चतुर्भि:

**30.** न्यायमते एतेषु प्रमेयम् अस्ति

(A) आकाश: (B) अधर्म:

(C) प्रयत्न: (D) अपवर्ग:

**31.** ''पञ्च पञ्चनखा: भक्ष्या'' अत्र दोष: अस्ति

(A) शब्दनिष्ठ:

(B) अर्थनिष्ठ:

(C) शब्दनिष्ठ: अर्थनिष्ठ:

(D) तात्पर्यनिष्ठ:

**32.** शारीरकसूत्राव्युपकुर्वन्ति

(A) उपनिषद: (B) वेदान्तिन:

(C) योगिन: (D) श्रोतॄन्

**33.** ''देवता: मन्त्रैरव स्मरणीया: भवन्ति''। इत्यत्रास्ति

(A) प्रयोग: (B) नियम:

(C) विधि: (D) विनियोग:

**34.** प्रकृति: नास्ति

(A) हेतुमती (B) सावयवा

(C) नित्या (D) स्वतन्त्रा

**35.** अक्लिष्टा: वृत्तय: सन्ति।

(A) चतस्र: (B) तिस्र:

(C) सप्त (D) पञ्च

**36.** सम्प्रज्ञातयोग: अस्ति।

(A) द्विविध: (B) त्रिविध:

(C) चतुर्विध: (D) पञ्चविध:

**37.** अज्ञानं नास्ति।

(A) त्रिगुणात्मकम् (B) भावरूपम्

(C) अभावात्मकम् (D) यत्किञ्चित्

**38.** ''त्रयमेकत्र संयम:'' इत्यत्र त्रयमेतद् भवति

(A) यमनियमप्राणायाम:

(B) धारणाध्यानसमाधय:

(C) यमनियमसमाधय:

(D) ध्यानप्राणायामसमाधय:

**39.** साधनचतुष्ट्ये शाङ्करभाष्यानुसारमेतन्नास्ति

(A) सम्बन्ध:

(B) मुमुक्षुत्वम्

(C) नित्यानित्यवस्तुविवेक:

(D) इहामुत्रफलभोगविराग:

**40.** पररूपं प्रति तन्तुरूपं कारणं भवति

(A) समवायिकारणम्

(B) उपादानकारणम्

(C) असमवायिकारणम्

(D) निमित्तकारणम्

**41.** धैवतस्वरस्य मूलो विद्यते

(A) उदात्ते (B) अनुदात्ते

(C) स्वरिते (D) न कस्मिन्नपि

**42.** समीचीनां तालिकां चिनुत।

| **साहित्यम्** | **अङ्का:** |
|---|---|
| a. वेणीसंहारम् | 1. 4 |
| b. उत्तररामचरितम् | 2. 10 |
| c. मृच्छकटिकम् | 3. 7 |
| d. रत्नावली | 4. 6 |

| | **a** | **b** | **c** | **d** |
|---|---|---|---|---|
| (A) | 4 | 1 | 2 | 3 |
| (B) | 4 | 3 | 2 | 1 |
| (C) | 3 | 2 | 1 | 4 |
| (D) | 4 | 2 | 3 | 1 |

**43.** उचितमेलनं कुरुत।

| | |
|---|---|
| a. अ | 1. कण्ठ: |
| b. य | 2. तालु: |
| c. र | 3. मूर्धा |
| d. ल | 4. दन्त: |

(A) a – 1 b – 2 c – 3 d – 4

(B) b – 2 a – 1 d – 4 c – 3

(C) c – 3 d – 4 a – 1 b – 2

(D) d – 4 a – 1 c – 3 b – 2

**44.** समुचितं मेलनं चिनुत।

| | |
|---|---|
| 1. सर्ग: | a. सृष्टि: |
| 2. प्रतिसर्ग: | b. प्रलय: |
| 3. वंश: | c. कुल-वर्णनम् |
| 4. मन्वन्तरम् | d. मनुपुत्राणां वर्णनम् |

(A) 1 – a 2 – b 3 – c 4 – d

(B) 1 – b 2 – a 3 – d 4 – c

(C) 1 – c 2 – d 3 – a 4 – b

(D) 1 – a 2 – b 3 – d 4 – c

**45.** समीचीनां तालिकां चिनुत।

| | |
|---|---|
| a. ऐहोल: | 1. यशोधर्मा |
| b. गिरनार: | 2. समुद्रगुप्त: |
| c. प्रयाग: | 3. अशोक: |
| d. माण्डासोर: | 4. पुलकेशी |

| | a | b | c | d |
|---|---|---|---|---|
| (A) | 4 | 3 | 2 | 1 |
| (B) | 1 | 2 | 3 | 4 |
| (C) | 3 | 4 | 1 | 2 |
| (D) | 2 | 1 | 4 | 3 |

गद्यांशमधीत्य (**46-50**) प्रश्नानुत्तरयत।

अथ प्रभाते क्षेत्रपतिर्लगुऽहस्तस्तं प्रदेशमागच्छन् काकेनावलोकित: तमालोक्य काकेनोक्तम् 'सखे मृग! त्वमात्मानं मृतवद् संदर्श्य वातेनोदरं पूरयित्वा पादान्यब्धीकृत्य तिष्ठ। यदाहं शब्दं करोमि तदा त्वमुत्थाय सत्वरं पलायिष्यसि'। मृगस्तथैव काकवचनेन स्थित:। तत: क्षेत्रपतिना हर्षोत्फुल्ललोचनेन तथाविधो मृग: आलोकित:। 'अहा:, स्वयं मृतोऽसि' इत्युक्त्वा मृगं बन्धनान्मोचयित्वा पाशान्ग्रहीतुं कृतयत्नो बभूव। तत: काकशब्दं श्रुत्वा मृग: सत्वरमुत्थाय पलायित:।

**46.** कृतयत्न: इत्यस्य विग्रहवाक्यम्
(A) यत्नेन कृत:
(B) कृतश्चासौ यत्नश्च
(C) कृत: यत्न: येन स:
(D) कृतं यत्नं स

**47.** हर्षोत्फुल्ल : इत्यत्र सन्धि क: ?
(A) गुण:
(B) वृद्धि:
(C) पूर्वरूपम्
(D) पररूपम्

**48.** ''सत्वरम्'' इति शब्दस्यार्थ :
(A) झटिति (B) मन्दम्
(C) शनै: (D) सत्त्वम्

**49.** ''क्षेत्रपति: काकेन अवलोकित:'' प्रयोगोऽयमस्ति
(A) कर्तरि (B) कर्मणि
(C) भावे (D) छन्दसि

**50.** ''<u>अब्धी</u>कृत्य इत्यत्र रेखाङ्कितपदे क: प्रत्यय: ?
(A) च्वि (B) घञ्
(C) ष्यञ् (D) कू क

**51.** 'प्रपर्ण:' इत्यस्य लौकिकविग्रहोऽस्ति
(A) प्रवृष्ट: पर्ण: (B) प्रपतिपर्ण:
(C) पोषितपर्ण: (D) परिपूर्ण:

**52.** 'ङेर्य:' इत्यनेन सिद्ध्यति
(A) कृष्णाय (B) भूतये
(C) बालिकायै (D) हरये

**53.** 'कैतवायनि:' इत्यत्र फिञ् प्रत्यय: केन भवति ?
(A) अणो द्वयच:
(B) तिकादिभ्य: फिञ्
(C) त्यदादीनां वा फिञ वक्तव्य:
(D) फक्फिञऽन्यतरस्याम्

**54.** 'आत्रेय:' इत्यत्र ढक् प्रत्यय: केन भवति ?
(A) द्वयच:
(B) शुभ्रादिभ्यश्च
(C) इतश्चानिञ:
(D) स्त्रीभ्यो ढक्

**55.** 'पाण्यम्' इत्यत्र प्रत्ययोऽस्ति

(A) यत्　(B) क्यप्

(C) ण्यत्　(D) व्यत्

**56.** 'खेयम्' इत्यत्र प्रत्ययोऽस्ति

(A) यत्　(B) क्यप्

(C) ण्यत्　(D) य

**57.** देवदत्तं शतं जयतीत्यत्र कर्मसंज्ञा केन भवति ?

(A) कर्तुरीप्सीतमं कर्म

(B) अकथितं च

(C) हृक्रोरन्यतरस्याम्

(D) शतेऽधमर्णे कर्म

**58.** आख्यातोपयोगे इति सूत्रमस्ति

(A) कर्मसंज्ञाविधायकम्

(B) पञ्चमीविधायकम्

(C) अधिकरणसंज्ञाविधायकम्

(D) अपादानसंज्ञाविधायकम्

**59.** कृत्यसंज्ञका: प्रत्यया: सन्ति

(A) पञ्च　(B) षट्

(C) अष्ट　(D) सप्त

**60.** निपातानाम् अव्ययसंज्ञाविधायकं सूत्रमस्ति

(A) अव्ययीभावश्च

(B) स्वरादिनिपातमव्ययम्

(C) निपाताच्चेति वक्तव्यम्

(D) प्राग्रीश्वरान्निपाताः

**61.** महाकवेरश्वघोषस्य मातुर्नाम आसीत्

(A) कदम्बा

(B) सुवर्णाक्षी

(C) अभिप्रिया

(D) मनावी

**62.** नारायणस्वामी आसीत्

(A) माघस्य पिता

(B) भारवे: भ्राता

(C) भारवे: पिता

(D) अश्वघोषस्य भ्राता

**63.** सौन्दरनन्दमहाकाव्ये सर्गा: सन्ति।

(A) एकोनविंशति:

(B) सप्तदश

(C) अष्टादश

(D) विंशति:

**64.** वेणीसंहारे अङ्का: सन्ति।

(A) सप्त

(B) पञ्च

(C) षट्

(D) अष्ट

**65.** दशकुमारचरिते पीठिका: सन्ति।

(A) तिस्र:

(B) द्वे

(C) पञ्च

(D) अष्ट

**66.** शान्तरस एव सर्वेषां रसानां मूलमिति कस्य मतम् ?

(A) आनन्दवर्धनस्य

(B) भरतस्य

(C) विश्वनाथस्य

(D) अभिनवगुप्तस्य

**67.** अधोलिखितानां प्रदत्तविकल्पेषु सम्यक् मेलनम् चिनुत।

| **आचार्या:** | **रीतीनां संख्या** |
|---|---|
| a. वामन: | 1. द्वादश |
| b. रुद्रट: | 2. षट् |
| c. शारदातनय: | 3. तिस्र: |
| d. नरेन्द्रप्रभसूरि: | 4. चतस्र: |

| | **a** | **b** | **c** | **d** |
|---|---|---|---|---|
| (A) | 3 | 4 | 2 | 1 |
| (B) | 3 | 4 | 1 | 2 |
| (C) | 4 | 2 | 3 | 1 |
| (D) | 3 | 2 | 1 | 4 |

**68.** प्रबन्धवक्रताया: भेदा: कति सन्ति ?

(A) सप्त (B) षट्

(C) अष्ट (D) षोडश

**69.** स्वभावोक्तिराद्य: अलंकार: इति कस्य मतम् ?

(A) दण्डिन: (B) कुन्तकस्य

(C) भामहस्य (D) रुद्रटस्य

**70.** कुन्तकप्रतिपादितेषु विशेषगुणेषु नास्ति

(A) प्रसाद: (B) लावण्यम्

(C) माधुर्यम् (D) सौभाग्य:

**71.** ''जगत: पितरौ वन्दे'' अस्मिन् वाक्ये क: कर्त्ता ?

(A) कालिदास:

(B) सहृदय:

(C) वयम्

(D) अहम्

**72.** हितं मनोहारि च दुर्लभं

(A) मन:

(B) धनम्

(C) वच:

(D) वपु:

**73.** शिशुपालस्य पितु: नाम किम् ?

(A) दन्तवक्र:

(B) वज्रनाथ:

(C) सुदम:

(D) दमघोष:

**74.** महती कस्य/कस्या: वीणा ?

(A) नारदस्य

(B) तुम्बरो:

(C) उदयनस्य

(D) सरस्वत्या:

**75.** वासवदत्ता कुत्र दग्धा इति सम्वाद: प्रसृत: ?

(A) तपोवने

(B) अरण्ये

(C) उज्जयिन्याम्

(D) लावाणकग्रामे

**76.** स्वप्नवासवदत्तस्य कस्मिन्नङ्के स्वप्न दर्शनं वर्णितम् ?

(A) चतुर्थे

(B) पञ्चमे

(C) तृतीये

(D) षष्ठे

**77.** शाकुन्तले गजप्रवेशफलेन किं भवति ?

(A) तपोवनस्य ध्वंस:

(B) नाटकस्य प्रलम्बनम्

(C) मुनिकन्यानां विश्राम:

(D) शकुन्तलाया: सुरक्षा

**78.** अत्र रिक्तस्थानं पूरयत।

चतुर्वर्गफलप्राप्ति: सुखादल्पधियामपि।

________ यतस्तेन तत्स्वरूपं निरूप्यते।।

(A) नाट्यादेव

(B) धर्मादेव

(C) काव्यादेव

(D) गुणादेव

**79.** काव्यप्रकाशानुसारं कवित्वबीजरूप: संस्कारविशेष :

(A) गुण:

(B) बुद्धि:

(C) शक्ति:

(D) निपुणता

**80.** ''शब्दार्थौ सहितावेव प्रतीतौ स्फुरत: सदा।। सहितविति तावेव किमपूर्वं विधीयते''।। इति कस्योक्ति: ?

(A) विश्वनाथस्य

(B) मम्मटस्य

(C) कुन्तकस्य

(D) जगन्नाथस्य

**81.** क्रौञ्चवधघटनामुपजीव्य प्रवर्तितं काव्यम्

(A) आनन्दरामायणम्

(B) अध्यात्मरामायणम्

(C) बालरामायणम्

(D) वाल्मीकिरामायणम्

**82.** रामायणमुपजीव्यं प्रवर्तितं दृश्यं काव्यमस्ति

(A) अध्यात्मरामायणम्

(B) जानकीहरणम्

(C) सेतुबन्ध:

(D) प्रतिमानाटकम्

**83.** कुन्दमालाया: उपजीव्यमस्ति

(A) रामायणम्

(B) महाभारतम्

(C) विष्णुपुराणम्

(D) हरिवंशम्

**84.** अष्टादश–पुराणानां कर्त्ता क: ?

(A) वाल्मीकि:

(B) वेदव्यास:

(C) वसिष्ठ:

(D) शुक्राचार्य:

**85.** चाणक्यस्य पर्यायनाम अस्ति

(A) चन्द्रगुप्त:

(B) समुद्रगुप्त

(C) विष्णुगुप्त:

(D) आर्यगुप्त:

**86.** स्मृतिग्रन्थानां वर्ण्यो विषय: प्रधानोऽयं भवति

(A) धर्म:

(B) आचार:

(C) ज्ञानम्

(D) तत्त्वम्

**87.** ब्राह्मीलिपौ ‘ L ’ इति वर्ण: देवनागरी लिपौ एवमस्ति

(A) अ

(B) ए

(C) उ

(D) ऋ

**88.** चन्द्रगुप्तद्वितीयस्य मथुराशिलालेखस्य लिपि: का ?

(A) देवनागरी

(B) खरोष्ठी

(C) ग्रीक

(D) ब्राह्मी

**89.** युग्मकानां मेलनं कुरुत

a. जानकीहरणम् — 1. राजशेखर:
b. अनर्धराघवम् — 2. कुमारदास:
c. बालभारतम् — 3. भास:
d. पञ्चरात्रम् — 4. मुरारि:

| | a | b | c | d |
|---|---|---|---|---|
| (A) | 2 | 4 | 3 | 1 |
| (B) | 1 | 2 | 4 | 3 |
| (C) | 2 | 4 | 1 | 3 |
| (D) | 3 | 4 | 2 | 1 |

**90.** करुणरस: कस्य काव्यस्य मुख्यरस: ?

(A) शिशुपालवधस्य

(B) नैषधीयचरितस्य

(C) रामायणस्य

(D) किरातार्जुनीयस्य

**91.** कौटिल्यमतानुसारं विद्या: कतिविधा: ?

(A) तिस्र:

(B) चतस्र:

(C) पञ्च

(D) षट्

**92.** रिक्तस्थानं पूरयत।
व्यवस्थितार्थमर्याद: कृतवर्णाश्रमस्थिति:।
________ रक्षितो लोक: प्रसीदति न सीदति।।

(A) वेदेन

(B) श्रुतेन

(C) त्रय्या हि

(D) धनेन

**93.** ''इदं शास्त्रमधीयानो ब्राह्मण: शंसितव्रत:।
मनो वाग् देहजैर्नित्यं कर्मदोषै: न लिप्यते'' – अत्र इदमिति किं सूचयति ?

(A) मानवम्

(B) जैमिनीयम्

(C) सांख्यम्

(D) अर्थशास्त्रम्

**94.** दण्डनीति: एका विद्येति को निरूपयति ?

(A) मनु:

(B) शुक्राचार्य:

(C) कौटिल्य:

(D) बृहस्पति:

**95.** क्षत्रियस्य कृते याज्ञवल्क्यानुसारं दिव्यप्रयोग:

(A) जलम्

(B) विषम्

(C) अग्नि:

(D) तुला

**96.** कस्येदं वचनमस्ति________

धर्मज्ञा: शुचयोऽलुब्धा भवेयु: कार्यचिन्तका:।

(A) याज्ञवल्क्यस्य

(B) पाराशरस्य

(C) मनो:

(D) शङ्खस्य

**97.** नारदस्मृत्यनुसारेण लेखनकलाया: अविष्कार: केन कृत: ?

(A) भरतेन

(B) ब्रह्मणा

(C) विष्णुना

(D) शिवेन

**98.** अशोकस्य गिरनारशिलालेखस्य लिपि: का ?

(A) खरोष्ठी

(B) ब्राह्मी

(C) देवनागरी

(D) सामी

**99.** ''वर्णानामानुलोम्येन दास्यं न प्रतिलोमत:'' कस्येदं वचनम् ?

(A) मनो:

(B) पाराशरस्य

(C) याज्ञवल्क्यस्य

(D) वसिष्ठस्य

**100.** समुद्रगुप्तस्य प्रयागस्य शिलालेख: कस्यां लिप्यां विद्यते ?

(A) देवनागरी

(B) नेवारी

(C) ब्राह्मी

(D) शारदा

**Space for Rough Work**